# Shri Chandrashekharendrasarasvati Chaturdashamanjarika Stotram

# શ્રી ચન્દ્રશેખરેન્દ્રસરસ્વતી ચતુર્દશમઞ્જરિકાસ્તોત્રમ્

## Document Information

Text title : Chandrashekharendrasarasvati Chaturdashamanjarika Stotram

File name : chandrashekharendrasarasvatIchaturdashamanjarikA.itx

Category : deities_misc, gurudev, dashaka, stotra

Location : doc_deities_misc

Author : S. Chandrasekharan

Transliterated by : S. Chandrasekharan

Proofread by : S. Chandrasekharan

Latest update : January 16, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 16, 2026

*sanskritdocuments.org*

# શ્રી ચન્દ્રશેખરેન્દ્રસરસ્વતી ચતુર્દશમઞ્જરિકાસ્તોત્રમ્

દેશિકં ભવરોગઘ્નં ચન્દ્રશેખર સદ્ગુરુમ્ ।
સુબ્રહ્મણ્યાત્મજં વન્દે સર્વલોકહિતઙ્કરમ્ ॥ ૧॥

શ્રી કામકોટિપીઠસ્થં જન્મદુઃખવિનાશકમ્ ।
સ્વામિનાથગુરું વન્દે શરણાગતરક્ષકમ્ ॥ ૨॥

ત્રિકાલજ્ઞાનસમ્પન્નં ત્રિપુરામ્બાપ્રપૂજકમ્ ।
મહાદેવગુરોઃશિષ્યં વન્દે મધુરભાષિણમ્ ॥ ૩॥

દણ્ડહસ્તં દયાસિન્ધું દક્ષિણામૂર્તિરૂપિણમ્ ।
દેહાભિમાનહીનં તં દીનબન્ધુમહં ભજે ॥ ૪॥

શિષ્યાનુગ્રહકર્તારં મહાલક્ષ્મીસુતં ગુરુમ્ ।
કાષાયધારિણં વન્દે કાઞ્ચીનગરવાસિનમ્ ॥ ૫॥

શ્રી જયેન્દ્રસરસ્વત્યા સ્વર્ણપુષ્પૈઃ સુપૂજિતમ્ ।
જ્ઞાનમાર્ગોપદેષ્ટારં તં નમામિ જગદ્ગુરુમ્ ॥ ૬॥

શિષ્યાણાન્તાપહન્તારં સર્વશાસ્ત્રવિશારદમ્ ।
નમામિ સુલભં શાન્તં કાઞ્ચીપુરનિવાસિનમ્ ॥ ૭॥

મન્દસ્મિતં મહાશ્રેષ્ઠં મોક્ષમાર્ગપ્રકાશકમ ।
સઙ્ગીતરસિકં વન્દે સર્વપાપપ્રણાશકમ્ ॥ ૮॥

શતાયુર્જીવિતં શિષ્ટં સર્વસિદ્ધિપ્રદાયકમ્ ।
ગોરક્ષણકરં વન્દે કામકોટિગુરું પરમ્ ॥ ૯॥

વેદવેદાન્તતત્ત્વજ્ઞં યોગલિઙ્ગપ્રપૂજકમ્ ।
પ્રણૌમિ પરયાભક્ત્યા પરમાનન્દદાયકમ્ ॥ ૧૦॥

કૈવલ્યપદદાતારં સંસારાર્ણવતારકમ્ ।
“મૈત્રીં ભજત” ગીતસ્ય કર્તારં પ્રણમામ્યહમ્ ॥ ૧૧॥

ભસ્મોદ્ધૂલિતસર્વાઙ્ગં ભવબન્ધવિમોચકમ્ ।
અપારકરુણામૂર્તિમાચાર્યં મણિમાશ્રયે ॥ ૧૨॥

શ્રીરામનામમન્ત્રસ્ય લેખકાનાં ચ પોષકમ્ ।
કાશિકાસેતુપર્યન્તં પાદયાત્રાકૃતં ભજે ॥ ૧૩॥

યોગમૂર્તિં ધર્મનિષ્ઠં કાષ્ઠમૌનપરાયણમ્ ।
અતિરુદ્રાદિયજ્ઞાનામ્પોષકં પ્રણમામ્યહમ્ ॥ ૧૪॥

ઇત્થં વિરચિતં સ્તોત્રં ચન્દ્રશેખરશર્મણા ।
જન્મસાફલ્યસિદ્ધ્યર્થં ગુરુપાદે સમર્પિતમ્ ॥ ૧૫॥

ઇતિ શ્રીચન્દ્રશેખરેન્દ્રસરસ્વતી ચતુર્દશમઞ્જરિકાસ્તોત્રં સમ્પૂર્ણમ્ ।

Composed, entered, and proofread by S. Chandrasekaran

---

*Shri Chandrashekharendrasarasvati Chaturdashamanjarika Stotram*

pdf was typeset on January 16, 2026

Please send corrections to *sanskrit@cheerful.com*